# २१. तपोवनषट्कम्

श्रीआनन्दप्रकाश विद्याप्रकाशः

व्याप्तं जगद्येन चिदात्मभावाद्
रज्ज्वा यथाऽहिर्हि चराचरं यत्।
संन्यस्य सर्वं च सदात्मभावे
स्वयं समस्तं च बभूव यस्तु ॥
निःसङ्गनिर्मुक्तिपदं प्रपद्य
ब्रह्मात्मभावेन विराजितो यः।
श्रीसौम्यकाशीशमहेश्वराय
तस्मै नमः स्वामितपोवनाय ॥ १ ॥

अखण्डभावः शिवरूपतत्त्वः
चितिस्वभावः परमात्मसत्यः।
सत्यस्य सत्यः सुधियैव गम्यः
परः प्रधानात्परमेश्वरो यः ॥
आद्यन्तहीनो निरपेक्षदीप्तिः
स्वतः स्वरूपेण विफुल्लितो यः।
श्रीसौम्यकाशीशमहेश्वराय
तस्मै नमः स्वामितपोवनाय ॥ २ ॥

मन्तुन्न शक्यो मनसा कदाचिद्
वक्तुन्न केनापि तथा न वाचा।
बोद्धुञ्च बुद्ध्यापि तथा न शक्यो
बुद्ध्यादिसाक्षी खलु केवलो यः ॥
सर्वेन्द्रियातीतपदस्थितोऽपि
सर्वेन्द्रियप्रेरयिता परो यः।
श्रीसौम्यकाशीशमहेश्वराय
तस्मै नमः स्वामितपोवनाय ॥ ३ ॥

शुद्धातिशुद्धश्च सदा प्रबुद्धो
विश्वेश्वरो विश्वपरः प्रसन्नः।
व्यापी परब्रह्मणि मोदमानो
वेदान्तसारः सुधियां शरण्यः॥
एको वशी सर्वभूताधिवासः
सर्वाधिपः सर्वजीवात्मको यः।
श्रीसौम्यकाशीशमहेश्वराय
तस्मै नमः स्वामितपोवनाय॥ ४॥

अशब्दमस्पर्शमरूपवच्च
तथारसं नित्यमगन्धवच्च।
निरञ्जनं नित्यनिरीहमेकं
बुद्धेः परं निर्गुण सद्ध्रुवञ्च॥
गुह्यं गभीरं गगनोपमं यं
पश्यन्ति निर्धूतमला यतीन्द्राः।
श्री सौम्यकाशीशमहेश्वराय
तस्मै नमः स्वामितपोवनाय॥ ५॥

तेजोमयं दिव्यममेयशक्तिं
सनातनं शान्तमनामयञ्च।
अद्वैतमाश्चर्यमचिन्त्यरूपं
परात्परं नित्यमनन्तमाद्यम्॥
ज्ञानप्रकाशेन विशुद्धसत्वो
यं पश्यति स्वात्मनि चिन्त्यमानम्।
श्रीसौम्यकाशीशमहेश्वराय
तस्मै नमः स्वामितपोवनाय॥ ६॥

## 21. Tapovana-ṣaṭkam

*Śrī Ānandaprakāśa Vidyāprakāśaḥ*

*vyāptaṁ jagadyena cidātmabhāvād*
*rajjvā yathā'hirhi carācaraṁ yat,*
*saṁnyasya sarvaṁ ca sadātmabhāve*
*svayaṁ samastaṁ ca babhūva yastu.*
*niḥsaṅga nirmuktipadaṁ prapadya*
*brahmātmabhāvena virājito yaḥ,*
*śrī saumyakāśīśa-maheśvarāya*
*tasmai namaḥ svāmi-tapovanāya. (1)*

*akhaṇḍabhāvaḥ śivarūpa-tattvavaḥ*
*citi svabhāvaḥ paramātmasatyaḥ,*
*satyasya satyaḥ sudhiyaiva gamyaḥ*
*paraḥ pradhānāt parameśvaro yaḥ.*
*ādyantahīno nirapekṣadīptiḥ*
*svataḥ svarūpeṇa viphullito yaḥ,*
*śrī saumyakāśīśa-maheśvarāya*
*tasmai namaḥ svāmi-tapovanāya. (2)*

*mantunna śakyo manasā kadācid*
*vaktunna kenāpi tathā na vācā,*
*boddhuñca buddhyāpi tathā na śakyoḥ*
*buddhyādi-sākṣī khalu kevalo yaḥ.*
*sarvendriyātīta-padasthito'pi*
*sarvendriya-prerayitā paro yaḥ,*
*śrī saumyakāśīśa-maheśvarāya*
*tasmai namaḥ svāmi-tapovanāya. (3)*

*śuddhātiśuddhañca sadā prabuddho*
*viśveśvaro viśvaparaḥ prasannaḥ,*
*vyāpī parabrahmaṇi modamāno*
*vedānta-sāraḥ sudhiyāṁ śaraṇyaḥ.*
*eko vaśī sarva-bhūtādhivāsaḥ*
*sarvādhipaḥ sarva-jīvātmako yaḥ,*
*śrī saumyakāśīśa-maheśvarāya*
*tasmai namaḥ svāmi-tapovanāya. (4)*

*aśabdam-asparśam-arūpavacca*
*tathārasaṁ nityam-agandhavacca,*
*nirañjanaṁ nitya-nirīhamekaṁ*
*buddheḥ paraṁ nirguṇa-saddhruvañca.*
*guhyaṁ gabhīraṁ gaganopamaṁ yaṁ*
*paśyanti nirdhūta-malā yatīndrāḥ,*
*śrī saumyakāśīśa-maheśvarāya*
*tasmai namaḥ svāmi-tapovanāya. (5)*

*tejomayaṁ divyam-ameyaśaktiṁ*
*sanātanaṁ śāntam-anāmayañca,*
*advaitam-āścaryam-acintyarūpaṁ*
*parātparaṁ nityam-anantamādyam.*
*jñānaprakāśena viśuddha satvo*
*yaṁ paśyati svātmani cintyamānam,*
*śrī saumyakāśīśa-maheśvarāya*
*tasmai namaḥ svāmi-tapovanāya. (6)*